ISSN : 2583-2271
Vol. - I, No. 1: 2021

# न्यायवैशेषिकमते कारणतावादविचारः

शिवप्रसादपोख्रेलः


## प्रबन्धसारः

*कारणेन कार्यस्योत्पत्तिर्भवति। कारणमन्तरा कार्यस्य कदापि उत्पत्तिर्नैव सम्भवति। यतः कार्यकारणयोरविनाभावसम्बन्धः लोकेऽवलोक्यते। तत्र दर्शनप्रस्थानेषु बौद्धाः असत्कार्यवादिनः सन्ति। तेषां नये अभावात् भावस्योत्पत्तिर्भवति। यथा बीजस्य नाशे सति अङ्कुरस्योत्पत्तिरिति। सांख्यमते तु उत्पत्तेः प्राक् कारणे कपाले घटस्य विद्यमानता इति इमे सांख्याः सत्कार्यवादिनः। वेदान्तप्रस्थाने अर्थात् अद्वैतनये इदं जगत् ब्रह्मविवर्त एव। अत एव इमे अद्वैतवेदान्तिनः विवर्तवादिनः। न्यायवैशेषिकप्रस्थाने तु उत्पत्तेः प्राक् कारणे कपाले घटस्य असत्वात् इमे असत्कार्यवादिनः। एतत्पक्षचतुष्टयं मनसि निधाय न्यायवैशेषिकप्रस्थाने कारणस्य व्युत्पत्तिपक्षमुपस्थाप्य तस्य कारणस्य किं स्वरूपमिति जिज्ञासायाम् आचार्यैः कारणस्य लक्षणमित्थं प्रतिपादितं यत् अन्यथासिद्धिशून्यत्वपदं कारणलक्षणे विशेषितम्। रासभेऽतिव्याप्तिवारणाय नियतपदमुपात्तम्। घटत्वेन स्वस्य स्वकारणत्वापत्तिवारणाय पूर्ववर्तित्वपदं कारणलक्षणे प्रतिपादितमाचार्यैः अन्यत्सर्वं प्रबन्धे प्रकाशितं भविष्यति। वेदान्तप्रस्थाने ब्रह्म जगतोऽभिन्ननिमित्तोपादानं भवति। अर्थात् तेषां नये ब्रह्म जगतः उपादानकारणं निमित्तकारणञ्च भवति। यथा लुता भवति। तन्तुकृते जालस्य कृते च। पारमार्थिकदशायां तेषां सिद्धान्तस्य विलक्षणत्वेऽपि व्यवहारदशायां तथा भवितुं नार्हति इति मनसि निधाय व्यवहारवादिनः न्यायवैशेषिकाः समवायि-असमवायि-निमित्तकारणभेदेन कारणस्य त्रैविध्यमुपपादितवन्तः। तथा चोच्यते–*

*"अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता।*
*कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम्॥*
*समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम्।*
*एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम्॥"*

*समवायिकारणता द्रव्यनिष्ठा भवतीति सिद्धान्तमभ्युपेत्य समवायिकारणलक्षणं वक्ति यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् इति। अर्थात् समवायिकारणं कपालं भवति, तत्र कपाले समवायेन घटस्योत्पत्तिर्भवति। पटस्य समवायिकारणं तन्तुर्भवति। तन्त्वौ समवायेन पटस्योत्पत्तिः। अतः घटस्य समवायिकारणं कपालं, पटस्य समवायिकारणं तन्तुश्च भवति। एवञ्च आदौ निर्गुणघटस्योत्पत्तिः, क्षणान्तरे च सगुणघटस्य घटरूपस्योत्पत्तिर्भवतीति घटरूपस्य समवायिकारणं घट इति। समवायिकारणे आसन्नं प्रत्यासन्नं च कारणमसमवायिकारणं भवति। यथा घटस्य असमवायिकारणं कपालद्वयसंयोगः, घटरूपस्य असमवायिकारणञ्च कपालरूपमिति। समवायिकारणभिन्नत्वे सति असमवायिकारणभिन्नत्वे सति कारणत्वं निमित्तकारणत्वमिति। यथा घटस्य निमित्तकारणं कुम्भकारः। उपर्युक्तविषये आचार्याणां यो हि विचारो विद्यते तस्य प्रकाशनम् अस्मिन् प्रबन्धे भविष्यति।*


**उपोद्घातः**

लोके कारणात् कार्यस्योत्पत्तिर्भवतीति सर्वैरभ्युपेयते। कारणमन्तरा कार्यस्योत्पत्तिरेव कथमपि भवितुं नार्हति। कार्यकारणयोरविनाभावसम्बन्ध- दर्शनात्। कारणमन्तरा यदि कार्यस्योत्पत्तिः स्वीक्रियते तर्हि तन्तुमन्तरा बीजमन्तरा वा पटस्य अङ्कुरादेर्वा उत्पत्तिः स्यात् कदापि कैरपि नाभ्युपेयते इत्यतः दर्शनशास्त्रे कारणतावादसिद्धान्तस्य स्थानम् अतीवमहत्त्वपूर्णं विद्यते।

कार्यते यत् तत् कारणम्। कार्यकारणसमर्थं वा इति कारणपदस्य सामान्यार्थः डुकृञ् करणे इत्यस्मात् धातोः णिचि, ल्युटि, अनि कृते (कृ + णिच् + ल्युट्) कारणशब्दः सिद्ध्यति। कार्यते येन तत् कारणम् करणे ल्युट्। अत्र कारणशब्दार्थः एव कारणस्य स्थूलं स्वरूपं लक्षणं वा विशिनष्टि। येन कस्यचन कार्यस्य सृष्टिः फलस्य प्रादुर्भावो वा भवति येन भवति यस्माद् वा भवति तस्य कार्यात् पूर्ववर्तिता अवश्यम्भावीति द्योत्यते। "**येन विना यन्न भवति तत् तत्पर्यायहेतु बीजम्**" तात्पर्यमिदं कारणं हेतु बोजमिति पर्याय शब्दाः। कारणं नाम सत्ता शक्तिर्वा यथा परिवर्तनं गतिः क्रिया वा सम्भवा, सा दशा स्थितितथ्यं वस्तु वा यद् कस्यचन अस्तित्वस्य स्थित्याः प्रक्रियायाःशृङ्खलायाः वा आधारभूतं यदेतेभ्यः पूर्व प्रवर्त्तते तत् कारणमिति मानविकी परिभाषा कारणस्यैतत् स्वरूपेण कायविषये निम्नलिखितं तथ्यम्। पुरस्तादागच्छति कारणं कार्यस्य जनकत्वात् कार्यात् पूर्ववृत्तित्वे सति कार्योत्पादकत्वम्। भारतीयदर्शने कारणस्य लक्षणमेतन्तथ्यम् आधारीकृत्यैवोपवर्णितम्। तद्यथा - **यस्य कार्यात्**

ISSN : 2583-2271
Vol. - I, No. 1: 2021

**पूर्वभावो नियतो कार्यकारणसमर्थो वानन्यथासिद्धश्च तत्कारणम्। यथा तन्तुवेमादिकं पटस्य कारणम्।** एका अपरापि परिभाषा इतोऽपि सुस्पष्टतया अनन्यथासिद्धनियतपूर्वभावित्वं कारणम् इति। न्यायवैशेषिकाभिमतैषा परिभाषा सामान्यतया सर्वेषु दर्शनेष्वभिमतमिति निश्चप्रचं वक्तुं शक्यते।

**कारणभेदाः**

कस्यचन कार्यसिद्धिः एकाधिककारण-पूर्विकेति लौकिकीदृष्टिः न केवलं दर्शने अपित्वाधुनिकविज्ञानेऽपि एतद्दर्शनमुररीक्रियते परन्तु मानवस्य परिमिता बुद्धिः न तानि सर्वाणि कारणानि परिभाषयितुं निश्चेतुं वा पारयति अतः कस्यचन कार्योत्पत्तौ अत्यावश्यकरूपेण सामान्यतया कारणत्रयमुपवर्णितम्। उपादानकारणम्, निमित्तकारणम्, साधारणकारणमिति।

**उपादानकारणम्**

कार्यस्योत्पत्तिः यस्मात् तत्त्वात् भवति तत्तत्त्वं तस्य कार्यस्योपादानकारणं तद्यथा घटः मृदः जायते अतो मृत्तिका घटस्य उपादानकारणम्, न चैतत् कारणम् कार्यात् पृथक् भवितुं शक्नोति। कारणनाशात् कार्यनाश एव भवति।

**निमित्तकारणम्**

कार्याद् बहिर्भूय कार्योत्पत्तिसहायकं निमित्तं कारणम्, यस्य कारणस्य सद्भावाद् उपादानकारणसाहाय्येन कार्यं निष्पद्यते तन्निमित्तकारणम्। किञ्च सर्वेषु कारणेषु, साधनेषु सत्स्वपि यं विना कार्य न सिद्ध्यति तन्निमित्तकारणम् अर्थात् कारणव्यापारस्य कर्ता एव निमित्तकारणम्। तद्यथा कुम्भकारः सत्सु उपादानकारणेषु मृत्तिकादिषु साधारणेषु दण्डचक्रादिषु न कुम्भकारं विना घटनिष्पत्तिः अतः कुम्भकार एव निमित्तकारणम्।

**साधारणकारणम्**

कार्यसिद्धौ उपादाननिमित्तकारणभिन्नं यदन्यत् सहयोगिकारणं तत्सर्व साधारणं कारणं घटनिर्माणे कुम्भकारः निमित्तकारणम्, मृद् उपादानकारणम् एतदतिरिक्तं दण्डचक्रकालदेशादि सर्व साधारणकारणम्। सामान्यतया दर्शनेषु एतद् साधारणं कारणम् गौणं निमित्तकारणमित्युच्यते न तत् युक्तियुक्तम्।

**सृष्टिकारणतासन्दर्भे कारणविवेचनम्**

सृष्टिकारणतासन्दर्भे जगन्निमित्तकारणं जगत्कर्त्ता इत्यभिधीयते स परमेश्वरः, उपादानकारणं सूक्ष्मप्रकृतिपरमाणुः साधारण-कारणं सृष्टिरचनायां कालसमयश्च।

सर्वेषु दर्शनेषु कार्यकारणभावविचारः प्रमुखतया भवति। परिदृश्यमानेषु विविधपदार्थेषु तत्तत्कारणजिज्ञासा नैसर्गिकी भवति। अस्याः जिज्ञासायाः उपशमनं प्रायः सर्वेषां दार्शनिकानां कर्तव्यं भवति। किन्तु नैयायिकाः एतन्निरूपणे दार्ढ्यं वहन्ति। साधारणतया जन्यं सर्वं कार्यमिति व्यवह्रियते। तेषां जननसामर्थ्यादेव कारणमिति व्यपदिश्यते।[1] कारणस्य लक्षणन्तु कार्यनियतपूर्ववर्त्तित्वमित्यन्नम्भट्टपादैः निरूपितम्।[2] इदमेव लक्षणं भाषापरिच्छेदे अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता। कारणत्वं भवेत्[3] इति विश्वनाथपञ्चाननैः प्रतिपादितम्। तर्कभाषायां केशवमिश्रपादैस्तु "यस्य कार्यात् पूर्वभावो नियतोऽनन्यथासिद्धश्च तत् कारणमिति अभिहितम्।" पूर्ववृत्तित्वं चाव्यवहितपूर्ववृत्तित्वं विवक्षितम्। नियतत्वञ्च व्यापकत्वम्। यथा यत्र यत्र घटोत्पत्तिस्तत्र तत्र दण्ड इति व्याप्तौ दण्डस्य व्यापकत्वम्। एवञ्च तत्र दण्डस्य कारणत्वम्। यद्यपि तन्तुरूपं पटस्य नियतपूर्ववर्ति तथाप्यन्यथासिद्धत्वात्तन्न कारणम्। तत्रेदमवधातव्यं यत्कार्यं प्रति अन्यथासिद्धत्वे सति नियतत्वे सति पूर्ववृत्तित्वं कारणत्वमिति कारणलक्षणे नियतत्वं तावत् व्यापकत्वम्, तच्च कार्याधिकरणवृत्त्यत्यन्ता-भावाऽप्रतियोगित्वम्। यत्किञ्चिद् घटं प्रति मृदाद्यानयनद्वारा रासभस्य कारणतासम्भवेऽपि घटत्वावच्छिन्नं प्रति कारणत्वं नास्ति, यतः यादृशघटादिकार्ये या मृत्तिका रासभेन न आनीता, तादृशघटवन्निष्ठात्यन्ताभाव-प्रतियोगित्वस्य रासभे सत्त्वात् रासभो न नियतपूर्ववृत्तिरिति। नियतत्वे सति पूर्ववर्तिनो दण्डत्वादेर्घटकारणत्वापत्तिवारणाय अन्यथासिद्धिशून्यत्वपदं कारणलक्षणे देयम्। दण्डत्वस्य अन्यथासिद्धत्वात् न तत्रातिव्याप्तिः। घटस्य घटत्वावच्छिन्ननिरूपिताऽन्यत्रक्लृप्तेत्याद्यन्यथासिद्धि-शून्यतया घटत्वावच्छिन्ननिरूपितव्यापकत्वात्मक-नियततया च घटत्वेन स्वस्य स्वकारणत्वा-पत्तिवारणाय पूर्ववृत्तित्वपदोपादानम्। तथा च अन्यथासिद्धिशून्यत्वे सति कार्यताऽवच्छेक-सम्बन्धेन कार्याऽधिकरणे कार्याऽव्यवहित-प्राक्क्षणावच्छेदेन विद्यमानाऽत्यन्ताभाव-प्रतियोगितानवच्छेदकधर्मत्त्वं कारणत्वमिति कारणलक्षणं फलितं भवति। अन्यथासिद्धिश्चा-वश्यक्लृप्तनियतपूर्ववर्तिनैव कार्यसम्भवे तत्सहभूतत्वम्। अन्यथासिद्ध-लक्षणं प्रतिपादयति विश्वनाथः "अवश्यक्लृप्त-नियतपूर्ववर्तिन एव कार्यसम्भवे तद्भिन्नमन्यसिद्धमित्यर्थः।"[4] अनुमितिचिन्ता-मणावस्य अन्यथासिद्धस्य त्रयो भेदाः प्रदर्शिताः सन्ति। न्यायसिद्धान्त-मुक्तावल्यां तु पञ्च।[5] अस्य अन्यथासिद्धस्य विचारः अग्रे करिष्यते। कार्यत्वञ्च प्रागभावप्रतियोगित्वम्।[6]

इदञ्च कारणं त्रिविधं – समवाय्यसमवायि-निमित्तभेदात्[7]। यत्र यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्।[8] यथा तन्तुः पटस्य समवायिकारणम्। अर्थात् समवायसम्बन्धेन सम्बद्ध सत् कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः। यद्धर्मावच्छिन्नं यद्धर्मावच्छिन्ने समवायेनोत्पद्यते तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नं समवायिकारणमिति। पटत्वावच्छिन्नं कार्य पटः तन्तुत्वावच्छिन्नेषु तन्तुषु समवायसम्बन्धेन उत्पद्यतेऽतः

---

[1] कार्योत्पादकत्वं कारणत्वम्, सप्तपदार्थी, पृ. २७९

[2] कार्यनियतपूर्ववृत्ति कारणम्, तर्कसंग्रहः, पृ. ६९

[3] कारिकावली १६

[4] न्या. सि., मु., पृ. ८९

[5] येन सह पूर्वभावः, कारिकावली **१९**

[6] तर्कसंग्रहः, पृ. ७१

[7] तत्रैव

[8] यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनक तत्, कारिकावली १८

पटत्वावच्छिन्नं प्रति तन्तुत्वावच्छिन्नं समवायिकारणम् इति। यस्मिन् कारणे कार्यञ्च साक्षात् समवेतं न भवति किन्तु परम्परया भवति तादशं कारणमसमवायिकारणमित्युच्यते।[9] यथा तन्तुरूपं पटरूपं प्रति "कार्येण कारणेन वा सहैकस्मिन्नर्थ समवेतं सत् कारणमसमवायिकारणम्[10] इति अन्नम्भट्टाः। "तत्रासन्नं जनकं द्वितीयमिति"[11] कारिकावलीकारः। "समवायिकारणे आसन्नं प्रत्यासन्नं कारणं द्वितीयसमवायिकारणम्"[12] इति मुक्तावलीकारः विश्वनाथः। वस्तुतः कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति आत्मविशेषगुणभिन्नत्वे सति यत् कारणं तदसमवायिकारणम् इति। अत्रेदमपि बोध्यं यत् कार्येण कारणेन वेति कथनात् असमवायिकारणस्य लक्षणद्वयं प्रतीयते। तथाहि कार्येण सहैकस्मिन्नर्थ समवेतत्वे सति यत्कारणं तदसमवायिकारणम्, यथा तन्तुसंयोगः पटस्येति द्वितीयञ्च कारणेन सहैकस्मिन्नर्थे समवेतत्वे सति यत्कारणं तदसमवायिकारणम्, यथा तन्तुरूपं पटरूपस्येति। एतदुभयभिन्नं कारणं निमित्तकारणम्। यथा तुरीवेमादिकं पटस्य।

निमित्तकारणं द्विविधम् – साधारणम् असाधारणञ्चेति। कार्यत्वावच्छिन्नं प्रति कारणत्वं साधारणकारणत्वम्। न्यायनये नव साधारणकारणानि स्वीकृतानि।[13] तानि चेश्वरस्तदीयज्ञानेच्छाकृतयः, प्रागभावः, कालो, दिक्, धर्माधर्मौ चेति। धर्माधर्मौ मिलित्वाष्टौ भवन्ति।[14] अर्वाचीननैयायिकैः प्रतिबन्धक-संसर्गाभावोऽपि साधारणकारणत्वेन स्वीकृतः।

असाधारणकारणञ्च दण्डचक्रादि तत्तत्कार्यं प्रति कारणं भवति। इदमेवासाधारणकारणं व्यापारवच्चेत् करणमिति व्यपदिश्यते। अद्वैतवेदान्ते कारणं द्विविधमेव उपादानकारणं निमित्तकारणञ्चेति। समवायानभ्युपगमात् समवायिकारणं न स्वीक्रियते। तत्स्थाने उपादानकारणं स्वीक्रियते। असमवायिकारणं केवलं नैयायिकानामेव कश्चन असाधारणो विषयः।

साधारणकारणेष्वपि प्रागभावो न कारणं वेदान्तिनां मते, अभावभेदानङ्गीकारात्। प्रतिबन्धकाभावोऽपि न कारणम्, अभावाद्भावोत्पत्तिस्वीकारापत्तेः। एवञ्च न्यायाद्वैतयोः कारणत्वसामान्यनिरूपणे कृते सति जगत्कारणत्वविचारः प्रवर्तते।

## सहायकग्रन्थसूची

- न्यायसिद्धान्तमुक्तावली – टीका. आचार्य लोकमणि दाहाल, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९९७
- तर्कसंग्रहः – सम्पा. श्रीकृष्णदल आचार्य, चौखम्बा विद्याभवन, वाराणसी, २००३
- कारिकावली – सम्पा. श्रीरामगोविन्दशुक्लः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, २००९
- तर्कभाषा – व्याख्या. गजाननशास्त्री मुसलगाँवकर, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९८४

9 असमवायिकारणं तदुच्यते यत्समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यं तदसमवायिकारणम् तर्कभाषा, पृ.४८

10 तर्कसङ्ग्रहः, पृ. ४८

11 कारिकावली १८

12 न्या. सि. मु. पृ. ८०

13 कार्यमात्रं प्रति साधारणकारणानि ईश्वरस्तदीय-ज्ञानेच्छाकृतयः प्रागभावकालदिगदृष्टानि, तर्कामृतम्, द्रव्यनिरूपणप्रकरणम्।

14 ईश्वरस्तदीयज्ञानेच्छाकृतयः प्रागभावकालदिगदृष्टान्यष्टौ साधारणकारणानि, वाक्यवृत्तिः।